✧˖‧˚*❋ ❋*˚‧˖✧

# પંચમુખ હનુમત્કવચમ્

# Panchamukha Hanuman Kavacham

**in** gujarati

✧˖‧˚*❋ ❋*˚‧˖✧

# ॥ પંચમુખ હનુમત્કવચમ્ ॥

અસ્ય શ્રી પંચમુખહનુમન્મંત્રસ્ય બ્રહ્મા ઋષિઃ ગાયત્રીછંદઃ પંચમુખવિરાટ્ હનુમાન્ દેવતા હ્રીં બીજં શ્રીં શક્તિઃ ક્રૌં કીલકં ક્રૂં કવચં ક્રૈં અસ્ત્રાય ફટ્ ઇતિ દિગ્બંધઃ ।

**શ્રી ગરુડ ઉવાચ**

અથ ધ્યાનં પ્રવક્ષ્યામિ શૃણુ સર્વાંગસુંદરિ ।
યત્કૃતં દેવદેવેન ધ્યાનં હનુમતઃ પ્રિયમ્ ॥ 1 ॥

પંચવક્ત્રં મહાભીમં ત્રિપંચનયનૈર્યુતમ્ ।
બાહુભિર્દશભિર્યુક્તં સર્વકામાર્થસિદ્ધિદમ્ ॥ 2 ॥

પૂર્વં તુ વાનરં વક્ત્રં કોટિસૂર્યસમપ્રભમ્ ।
દંષ્ટ્રાકરાળવદનં ભૃકુટીકુટિલેક્ષણમ્ ॥ 3 ॥

અસ્યૈવ દક્ષિણં વક્ત્રં નારસિંહં મહાદ્ભુતમ્ ।
અત્યુગ્રતેજોવપુષં ભીષણં ભયનાશનમ્ ॥ 4 ॥

પશ્ચિમં ગારુડં વક્ત્રં વક્રતુંડં મહાબલમ્ ।
સર્વનાગપ્રશમનં વિષભૂતાદિકૃંતનમ્ ॥ 5 ॥

ઉત્તરં સૌકરં વક્ત્રં કૃષ્ણં દીપ્તં નભોપમમ્ ।
પાતાળસિંહવેતાલજ્વરરોગાદિકૃંતનમ્ ॥ 6 ॥

ઊર્ધ્વં હયાનનં ઘોરં દાનવાંતકરં પરમ્ ।
યેન વક્ત્રેણ વિપ્રેંદ્ર તારકાખ્યં મહાસુરમ્ ॥ 7 ॥

જઘાન શરણં તત્સ્યાત્સર્વશત્રુહરં પરમ્ ।
ધ્યાત્વા પંચમુખં રુદ્રં હનૂમંતં દયાનિધિમ્ ॥ 8 ॥

ખડ્ગં ત્રિશૂલં ખટ્વાંગં પાશમંકુશપર્વતમ્ ।
મુષ્ટિં કૌમોદકીં વૃક્ષં ધારયંતં કમંડલુમ્ ॥ 9 ॥

ભિંદિપાલં જ્ઞાનમુદ્રાં દશભિર્મુનિપુંગવમ્ ।
એતાન્યાયુધજાલાનિ ધારયંતં ભજામ્યહમ્ ॥ 10 ॥

પ્રેતાસનોપવિષ્ટં તં સર્વાભરણભૂષિતમ્ ।
દિવ્યમાલ્યાંબરધરં દિવ્યગંધાનુલેપનમ્ ।
સર્વાશ્ચર્યમયં દેવં હનુમદ્વિશ્વતોમુખમ્ ॥ 11 ॥

પંચાસ્યમચ્યુતમનેકવિચિત્રવર્ણ-
-વક્ત્રં શશાંકશિખરં કપિરાજવર્યમ્ ।
પીતાંબરાદિમુકુટૈરુપશોભિતાંગં
પિંગાક્ષમાદ્યમનિશં મનસા સ્મરામિ ॥ 12 ॥

મર્કટેશં મહોત્સાહં સર્વશત્રુહરં પરમ્ ।
શત્રું સંહર માં રક્ષ શ્રીમન્નાપદમુદ્ધર ॥ 13 ॥

હરિમર્કટ મર્કટ મંત્રમિદં
પરિલિખ્યતિ લિખ્યતિ વામતલે ।
યદિ નશ્યતિ નશ્યતિ શત્રુકુલં
યદિ મુંચતિ મુંચતિ વામલતા ॥ 14 ॥

ઓં હરિમર્કટાય સ્વાહા ।

ઓં નમો ભગવતે પંચવદનાય પૂર્વકપિમુખાય સકલશત્રુસંહારકાય સ્વાહા ।
ઓં નમો ભગવતે પંચવદનાય દક્ષિણમુખાય કરાળવદનાય નરસિંહાય
સકલભૂતપ્રમથનાય સ્વાહા ।
ઓં નમો ભગવતે પંચવદનાય પશ્ચિમમુખાય ગરુડાનનાય સકલવિષહરાય સ્વાહા ।
ઓં નમો ભગવતે પંચવદનાય ઉત્તરમુખાય આદિવરાહાય સકલસંપત્કરાય સ્વાહા ।
ઓં નમો ભગવતે પંચવદનાય ઊર્ધ્વમુખાય હયગ્રીવાય સકલજનવશંકરાય સ્વાહા ।

ઓં અસ્ય શ્રી પંચમુખહનુમન્મંત્રસ્ય શ્રીરામચંદ્ર ઋષિઃ અનુષ્ટુપ્છંદઃ પંચમુખવીરહનુમાન્ દેવતા હનુમાન્ ઇતિ બીજં વાયુપુત્ર ઇતિ શક્તિઃ અંજનીસુત ઇતિ કીલકં શ્રીરામદૂતહનુમત્પ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
ઇતિ ઋષ્યાદિકં વિન્યસેત્ ।

**અથ કરન્યાસઃ ।**

ઓં અંજનીસુતાય અંગુષ્ઠાભ્યાં નમઃ ।
ઓં રુદ્રમૂર્તયે તર્જનીભ્યાં નમઃ ।
ઓં વાયુપુત્રાય મધ્યમાભ્યાં નમઃ ।
ઓં અગ્નિગર્ભાય અનામિકાભ્યાં નમઃ ।
ઓં રામદૂતાય કનિષ્ઠિકાભ્યાં નમઃ ।
ઓં પંચમુખહનુમતે કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

**અથ અંગન્યાસઃ ।**

ઓં અંજનીસુતાય હૃદયાય નમઃ ।
ઓં રુદ્રમૂર્તયે શિરસે સ્વાહા ।
ઓં વાયુપુત્રાય શિખાયૈ વષટ્ ।
ઓં અગ્નિગર્ભાય કવચાય હુમ્ ।
ઓં રામદૂતાય નેત્રત્રયાય વૌષટ્ ।
ઓં પંચમુખહનુમતે અસ્ત્રાય ફટ્ ।
પંચમુખહનુમતે સ્વાહા ઇતિ દિગ્બંધઃ ।

**અથ ધ્યાનમ્ ।**

વંદે વાનરનારસિંહખગરાટ્ક્રોડાશ્વવક્ત્રાન્વિતં
દિવ્યાલંકરણં ત્રિપંચનયનં દેદીપ્યમાનં રુચા ।
હસ્તાબ્જૈરસિખેટપુસ્તકસુધાકુંભાંકુશાદ્રિં હલં
ખટ્વાંગં ફણિભૂરુહં દશભુજં સર્વારિવીરાપહમ્ ।

**અથ મંત્રઃ ।**

ઓં શ્રીરામદૂતાય આંજનેયાય વાયુપુત્રાય મહાબલપરાક્રમાય સીતાદુઃખનિવારણાય
લંકાદહનકારણાય મહાબલપ્રચંડાય ફાલ્ગુનસખાય કોલાહલસકલબ્રહ્માંડવિશ્વરૂપાય
સપ્તસમુદ્રનિર્લંઘનાય પિંગળનયનાય અમિતવિક્રમાય સૂર્યબિંબફલસેવનાય
દુષ્ટનિવારણાય દૃષ્ટિનિરાલંકૃતાય સંજીવિનીસંજીવિતાંગદ-લક્ષ્મણમહાકપિસૈન્યપ્રાણદાય
દશકંઠવિધ્વંસનાય રામેષ્ટાય મહાફાલ્ગુનસખાય સીતાસહિતરામવરપ્રદાય
ષટ્પ્રયોગાગમપંચમુખવીરહનુમન્મંત્રજપે વિનિયોગઃ ।

ઓં હરિમર્કટમર્કટાય બંબંબંબંબં વૌષટ્ સ્વાહા ।
ઓં હરિમર્કટમર્કટાય ફંફંફંફંફં ફટ્ સ્વાહા ।
ઓં હરિમર્કટમર્કટાય ખેંખેંખેંખેંખેં મારણાય સ્વાહા ।
ઓં હરિમર્કટમર્કટાય લુંલુંલુંલુંલું આકર્ષિતસકલસંપત્કરાય સ્વાહા ।
ઓં હરિમર્કટમર્કટાય ધંધંધંધંધં શત્રુસ્તંભનાય સ્વાહા ।

ઓં ટંટંટંટંટં કૂર્મમૂર્તયે પંચમુખવીરહનુમતે પરયંત્ર પરતંત્રોચ્ચાટનાય સ્વાહા ।
ઓં કંખંગંઘંઙં ચંછંજંઝંઞં ટંઠંડંઢંણં તંથંદંધંનં પંફંબંભંમં યંરંલંવં શંષંસંહં ળંક્ષં સ્વાહા ।
ઇતિ દિગ્બંધઃ ।

ઓં પૂર્વકપિમુખાય પંચમુખહનુમતે ટંટંટંટંટં સકલશત્રુસંહરણાય સ્વાહા ।
ઓં દક્ષિણમુખાય પંચમુખહનુમતે કરાળવદનાય નરસિંહાય ઓં હ્રાં હ્રીં હ્રૂં હ્રૈં હ્રૌં હ્રઃ
સકલભૂતપ્રેતદમનાય સ્વાહા ।
ઓં પશ્ચિમમુખાય ગરુડાનનાય પંચમુખહનુમતે મંમંમંમંમં સકલવિષહરાય સ્વાહા ।
ઓં ઉત્તરમુખાય આદિવરાહાય લંલંલંલંલં નૃસિંહાય નીલકંઠમૂર્તયે પંચમુખહનુમતે સ્વાહા
।
ઓં ઊર્ધ્વમુખાય હયગ્રીવાય રુંરુંરુંરુંરું રુદ્રમૂર્તયે સકલપ્રયોજનનિર્વાહકાય સ્વાહા ।

ઓં અંજનીસુતાય વાયુપુત્રાય મહાબલાય સીતાશોકનિવારણાય શ્રીરામચંદ્રકૃપાપાદુકાય
મહાવીર્યપ્રમથનાય બ્રહ્માંડનાથાય કામદાય પંચમુખવીરહનુમતે સ્વાહા ।

ભૂતપ્રેતપિશાચબ્રહ્મરાક્ષસ શાકિનીડાકિન્યંતરિક્ષગ્રહ પરયંત્ર પરતંત્રોચ્ચટનાય સ્વાહા ।
સકલપ્રયોજનનિર્વાહકાય પંચમુખવીરહનુમતે શ્રીરામચંદ્રવરપ્રસાદાય જંજંજંજંજં સ્વાહા

।

ઇદં કવચં પઠિત્વા તુ મહાકવચં પઠેન્નરઃ ।
એકવારં જપેત્ સ્તોત્રં સર્વશત્રુનિવારણમ્ ॥ 15 ॥

દ્વિવારં તુ પઠેન્નિત્યં પુત્રપૌત્રપ્રવર્ધનમ્ ।
ત્રિવારં ચ પઠેન્નિત્યં સર્વસંપત્કરં શુભમ્ ॥ 16 ॥

ચતુર્વારં પઠેન્નિત્યં સર્વરોગનિવારણમ્ ।
પંચવારં પઠેન્નિત્યં સર્વલોકવશંકરમ્ ॥ 17 ॥

ષડ્વારં ચ પઠેન્નિત્યં સર્વદેવવશંકરમ્ ।
સપ્તવારં પઠેન્નિત્યં સર્વસૌભાગ્યદાયકમ્ ॥ 18 ॥

અષ્ટવારં પઠેન્નિત્યમિષ્ટકામાર્થસિદ્ધિદમ્ ।
નવવારં પઠેન્નિત્યં રાજભોગમવાપ્નુયાત્ ॥ 19 ॥

દશવારં પઠેન્નિત્યં ત્રૈલોક્યજ્ઞાનદર્શનમ્ ।
રુદ્રાવૃત્તિં પઠેન્નિત્યં સર્વસિદ્ધિર્ભવેદ્ધ્રુવમ્ ॥ 20 ॥

નિર્બલો રોગયુક્તશ્ચ મહાવ્યાધ્યાદિપીડિતઃ ।
કવચસ્મરણેનૈવ મહાબલમવાપ્નુયાત્ ॥ 21 ॥

**ઇતિ સુદર્શનસંહિતાયાં શ્રીરામચંદ્રસીતાપ્રોક્તં શ્રી પંચમુખહનુમત્કવચમ્ ।**

✧˳·˖✶ ✶˖·˳✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net